SHODH PATRA
Multidisciplinary, Multi-Lingual, Peer Reviewed Open Access Journal
ISSN : 3048-7196, Impact Factor 6.3
Vol. 2, No. 1, Year 2025
Available online : https://shodhpatra.in/

# श्रीहर्षस्य रचनाशैली - एकं विश्लेषणात्मकम् अध्ययनम्

अञ्जन कुमार विश्वासः, विद्यावारिधिः गवेषक, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी, असमप्रदेशः, पत्रवाहनसङ्ख्या : 781337

वैद्युतकसन्देश : akbeduin@gmail.com

डॉ. नुरिमा इयास्मिन्, सह-प्राध्यापिका, कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालयः, नलबारी, असमप्रदेशः, पत्रवाहनसङ्ख्या : 781337

वैद्युतकसन्देश : nurimayeasmin@gmail.com

**सारसंक्षेपः** संस्कृतसाहित्याकाशे विद्योतन्ते सहस्रसः काव्यनक्षत्राणि। कवरत्नानि च सन्ति अपरिमिताः संस्कृतकाव्य- रत्नाकरे। परन्तु तेषु असंख्येषु कविरत्नेषु हर्षवर्धणः एव कौस्तुभमणिवद् विभाति। हर्षस्य द्वयोः नाटिकयोः शृङ्गाररसः तथा नागानन्दे शान्तरसः स्तः। यथास्थाने तेन वीर-हास्य-करुणरसानां समावेशनञ्चकार। श्रीहर्षस्य रचनायां वैदर्भीरीतेः तथा प्रसादमाधुर्याभ्यां ओजगुणस्य समन्वयः दृश्यते। प्रौढभाषा-सुसंस्कृत-भावाभिव्यक्ति, उपमा-रूपक-उत्प्रेक्षा-अर्थान्तरन्यासादीनां सुप्रयोगः श्रीहर्षस्य रचनायां लभ्यते। वृक्ष-वन-पर्वत-राजभवन-उपवन-सूर्योदय-सूर्यास्त-ग्रीष्मादीनां प्राकृतिकवर्णनां सुरुचिपुर्ण-वर्णना श्रीहर्षस्य रचनायां दरीदृश्यते। श्रीहर्षस्य नाटकानां पठनं कृत्वैव ज्ञायते यत् सङ्गीतशास्त्र-काव्यशास्त्र-नाट्यशास्त्र-दर्शनशास्त्र-कामशास्त्र-नीतिशास्त्र-वैद्यशास्त्र-ज्योतिषशास्त्रेषु सः महान् विशेषज्ञः आसीत्। अस्मिन् लगुशोधप्रवन्धे श्रीहर्षस्य रचनाशैली सविस्तारेण आलोच्यितमस्ति।

**कुञ्चिकाशब्दः** उर्वरकल्पनाशक्तिः, आत्महननम्, मुखचन्द्रम्, भावसौन्दर्यम्, आह्लादकत्वम् , प्रेमबन्धनम्, भयङ्करयुद्धम्।

श्रीहर्षस्तु वैदर्भीरीतेः सफलो कविः। तस्य रचनायां प्रसादमाधुर्याभ्यां ओजगुणस्य समन्वयोऽपि दृश्यते। प्रौढभाषा-सुसंस्कृत-भावाभिव्यक्तिभिः तस्य रचनाः वर्तन्ते। भाषासु सदा गतिमयता परिदृष्टा। कविरूपेण तस्मिन् प्रौढता तथा उर्वरकल्पनाशक्तिः इति द्वयञ्चास्ति। तस्य कल्पनायां सदा नवीनत्वं दृश्यते। कवित्वेन सह तस्य काव्येषु सङ्गीतात्मकायाः अपि परिचयः लभ्यते। हर्षस्य द्वयोः नाटिकयोः शृङ्गाररसः तथा नागानन्दे शान्तरसः स्तः। वीरस्तु मुख्योऽस्ति। यथास्थाने तेन वीर-हास्य-करुणरसानां समावेशनञ्चकार। कुत्रापि अलङ्कारार्थमलङ्काराणां प्रयोगः तेन न कृतः। स्वाभाविकतया उपमा-रूपक-उत्प्रेक्षा-अर्थान्तरन्यासादीनां सुप्रयोगः लभ्यते। प्रकृतिवर्णने सः सिद्धहस्त आसीत्। तस्य प्राकृतिकवर्णनेषु यथार्थता,

 © Shodh Patra

स्वाभाविकता, चित्रात्मकता च वर्तन्ते। वृक्ष-वन-पर्वत-राजभवन-उपवन-सूर्योदय-सूर्यास्त-ग्रीष्मादीनां प्राकृतिकवर्णानां सुरुचिपुर्णतया चित्रणमभवत्। नाटकानां पठनं कृत्वैव ज्ञायते यत् सङ्गीतशास्त्र-काव्यशास्त्र-नाट्यशास्त्र-दर्शनशास्त्र-कामशास्त्र-नीतिशास्त्र-वैद्यशास्त्र-ज्योतिष-शास्त्रेषु सः महान् विशेषज्ञः आसीत्। विविधशास्त्रज्ञानहेतोः तस्य नाटकेषु अतिरोचकतास्ति।

भाषासु तस्य महान् अधिकारः आसीत्। प्रसङ्गानुसारं सरलात् सरलतमं तथा कठिनात् कठिनतमं संस्कृतप्रयोगः कर्तुं शक्यते। शृङ्गारादिभावेषु वैदर्भीरीत्या सह प्रसाद-माधुर्यगुणयोः समन्वयः दृश्यते। सैन्यैः गृहीता सागरिका मृता इति राज्ञः संशयोऽभवत्। विरहेण खिन्नः राजा आत्महननार्थं संप्राार्थ्य अवोचत् -

प्राणाः परित्यजत काममदक्षिणं मां

रे दक्षिणा भवत मद्वचनं श्रुणुध्वम्।

शीघ्र न यात यदि तन्मुषिताः स्थ नूनम्

याता सुदूरमधुना गजगामिनी सा॥[१]

अर्थात् हे प्राणाः ! मत्कथनं पालय। अत्यर्थं निरनुक्रोशं मां मुञ्चत। उदराः जायध्वम्। यदि शीघ्रं न गच्छत तदा हताः स्थ। गजगामिनी सा सागरिका इदानीं सुदूरमतिक्रान्ता।

वासवदत्तायाः सौन्दर्यवर्णनपूर्वकम् आह –

देवि त्वन्मुखपङकजेन शशिनः शोभातिरस्कारिणा

पश्याब्जानि विनिर्जितानि सहसा गच्छन्ति विच्छायताम्।

श्रुत्वा त्वत्परिवारवारवनितागीतानि भृङगाङ्गना

लीयन्ते मुकुलान्तरेषु शनकैः संजातलज्जा इव॥[२]

अर्थात् हे प्रिये ! अवलोकयत। चन्द्रस्य शोभायाः तिरस्कारिणा भवत्याः आननमेव कमलं तेन विनिर्जितानि कमलानि झटिति विच्छायताम् गच्छन्ति। तव परिवाराणां वारवनितानां गीतानि श्रुत्वा सञ्जातलज्जा भ्रमर्यः मुकुलानामभ्यन्तरेषु मन्दं प्रविशन्ति। श्लोकेऽस्मिन् भावसौन्दर्यं तथा भाषासौन्दर्यमास्वादिते। अत्र सुन्दरः उत्प्रेक्षालङ्कारोऽप्यस्ति।

भावसुकुमारता अपि सुकुमारशब्दैः वर्णितास्ति। तृतीयाङ्के वासवदत्तायाः छद्मवेशेन आगतां सागरिकां राजा स्वमनोभावं प्राकटयत्। सायंकाल उपस्थितः। चन्दमा उदितोऽस्ति। राजा सागरिकायाः मुखचन्द्रे चन्द्रमसः सर्वान् गुणान् पश्यन्नेव आह –

SHODH PATRA
Multidisciplinary, Multi-Lingual, Peer Reviewed Open Access Journal
ISSN: 3048-7196, Impact Factor 6.3
Vol. 2, No. 1, Year 2025
Available online : https://shodhpatra.in/

किं पद्मस्य रुचं न हन्ति नयनानन्दं विधत्ते न कि

वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम्।

वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्गतो

दर्पः स्यादमृतेन चेदिह तदप्येवास्ति बिम्बाधरे ॥[३]

अर्थात् पुरोवर्त्ती तव सागरिकायाः अयं मुखचन्द्रः कमलकान्तिं हन्ति। नेत्राणाम् आह्लादकत्वं जनयति। दर्शनमात्रेण कामं वर्धयति। भवत्याः वदनचन्द्रे सति दृश्यमानः अपरः शुरिन्दुः उदितश्चेत् अमृतेन चन्द्रस्याहङ्कारः स्यात्तदमृतमपि बिम्बफलतुल्याधरोष्ठे अस्तीति।

प्रेमिकामवलोक्यं प्रेमिकस्य हृदये कीदृशी उन्मादता उद्भूता इति स्पष्टम्। अत्र भावसौन्दर्येण सह भाषासौन्दर्यम् वर्तते। सागरिका उदयने अनुरक्तास्ति। उदयनस्य दुर्लभतां दृष्ट्वा सा खिन्नास्ति। तन्मते प्रेममार्गस्तु विषमो वर्तते। मरणमेव तत्र रक्षकोऽस्ति –

दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा।

प्रियसखि विषमं प्रेम मरणं शरणं नु वरमेकम्।।[४]

अर्थात् दुर्लभे जने अनुरागो विद्यते। लज्जा गुर्वी आत्मा परवशः। विषमं प्रेम तस्मिञ्जने प्रणयसञ्चारः अनुपयुक्तः। अतः मरणमेव शरणं नान्यदिति।

कविना प्रेमिक-प्रेमिकयोः मनोभावं सम्यग्रूपेण चित्रितवान्। राजा उदयनः सागरिकायामुन्मत्तोऽस्ति। सः सागरिकानाम्ना वासवदत्तां सम्बोधितवान्। अनन्तरं स्वप्रमादं अवगम्य क्षमां प्रार्थितवान्। वासवदत्ता क्रुद्ध्वा ततः गतवती। गूढेऽस्मिन् प्रेमसंबन्धे इयं घटना अतिदुःखप्रदायिकास्ति इति राजा सन्दिग्धवान्। यतो हि राजा तावत्पर्यन्तमेकमपि अपराधं न चकार। अयमपराधः द्वयोः प्रेमबन्धनं छेत्स्यति इतिबिभेति। भेदोऽयं तया सोढुं न शक्ष्यते तथा सा आत्महननं करिष्यति इति -

समारूढा प्रीतिः प्रणयबहुमानादनुदिनं

व्यलीकं वीक्ष्येदं कृतमकृतपूर्वं खलु मया।

प्रिया मुञ्चत्यद्य स्फुटमसहना जीवितमसौ

प्रकृष्टस्य प्रेम्णः स्खलितमविषह्य हि भवति।।[५]

अर्थात् उच्यते यत् प्रणयस्य समादरणात् प्रीतिः प्रतिदिनं वृद्धिं गता। अकृतपूर्वम् एतत् अकार्यम् मया अद्य विहितम्। एतत् दृष्ट्वा असहिष्णुः असौ वासवदत्ता निश्चितमेव स्वजीवनं त्यक्षति। यतो हि उत्कृष्टस्य प्रणयस्य च्युतिः असहनीया भवति।

सागरिकानुरागे प्रमत्तः राजा उदयनः बहुवारं स्वप्रमादवशात् गृहीतोऽभवत्। सः क्षमायाचनमपि अकरोत्। परन्तु अन्तिमोऽयं कृतप्रमादः क्षमायाचने व्यर्थोऽभवत्। वासवदत्ता खिन्नो जाता। सा प्रणयकोपं स्वाश्रुणा दूरीकृतवती। चिन्तितो राजा वासवदत्ताविषये अकथयत् –

सव्याजः शपथैः प्रियेण वचसा चित्तानुवृत्त्याधिकं

वैलक्ष्येण परेण पादपतनैर्वाक्यैः सखीनां मुहुः।

प्रत्यापत्तिमुपागता न हि तथा देवी रुदत्या यथा

प्रक्षाल्येव तयैव बाष्पसलिलैः कोपोऽपनीतः स्वयम्।।[६]

अर्थात् सकपटैः प्रतिज्ञावचनैः प्रीतिकरेण वाक्येन अधिकं चित्तपरिचर्यया महता विस्मयान्वितभावेन पादपतनैः पुनःपुनः सखीनां वचनैः प्रबोधनोक्तिभिः देवी वासवदत्ता न हि तथा प्रकृतिस्थतां प्राप्ता यथा कृतरोदनया देव्या आत्मना अश्रुजलैः कोपः दूरीकृतः।

सायंकालः उपस्थितः। सूर्यः अस्तं गच्छति। दुःखेन कमलिनी म्लानोऽभवत्। सूर्यः स्वप्रियाः कमलिन्याः मस्तकोपरि हस्तं संस्थाप्य आश्वासञ्चकार यत् भाग्यचक्रहेतोः तस्येदं प्रवासगमनम्। सः आगत्य स्वयमेव तां जागरयिष्यति इति-

यातोऽस्मि पद्मनयने समयो ममेष सुप्ता

मयैव भवती प्रतिबोधनीया।

प्रत्यायनामयमितीव सरोरुहिण्या

सूर्योऽस्तमस्तकनिविष्टकरः करोति।।[७]

श्लोकेऽस्मिन चेतनाचेतनयोः तादात्म्यं संस्थापितं वर्तते। यथा प्रेमी प्रवासगमनकाले स्वभार्यामाश्वासयति यत् पुनः प्रत्यागत्य सः तां प्रसादयिष्यति। तथैव सूर्यः स्वप्रियाय कमलिन्यै आश्वासनं प्रयच्छति यत् श्वः प्रातः आगत्य सन्तोषयिष्यति। प्रकृत्या सह तादात्म्यानुभूतेः इदं सुन्दरमेकमुदाहरणम्।

यथास्थानं कविः स्वप्रबुद्धां कल्पनाशक्तिमुपयुक्तवान्। सागरिकावियोगे राजा उदयनः सन्तप्त आसीत्। कामदेवस्य असाधारणयोग्यतां वर्णयन् कथयति यत् चञ्चलत्वात् अणुत्वात् अलक्ष्यमिदं मनः। किन्तु कथमिदं सर्वं कामबाणैः बिद्धं वक्तुं न शक्यते। राज्ञः कथनम् –

मनश्चलं प्रकृत्यैव दुर्लक्ष्यं च तथापि मे।

कामेनैतत्कथं विद्धं समं सर्वैः शिलीमुखैः॥[८]

अर्थात् चित्तं स्वभावेन चञ्चलं दुर्लक्ष्यञ्च। मनसः चलत्वे सूक्ष्मत्वे सत्यपि मम मनः कामेन सर्वैः बाणैः तुल्कालं केन प्रकारेण बिद्धम् ?

भावानुसारं शैलीभेदः कविना कृतः। युद्धवर्णने गौडीरीतेः वर्णनं समुपलभ्यते। भयङ्करयुद्धे रुमण्वान् कोसलनरेशम् आचक्राम। द्वयोः कृतयुद्धस्य चित्रणं कविना एवं कृतम् –

योद्धुं निर्गत्य विन्ध्यादभवदभिमुखस्तत्क्षणं दिग्विभागान्

विन्ध्येनेवाप्रेण द्विपपतिपूतनापीडबन्धेन रुन्छन्।

वेगाद्बाणान्विमुञ्चन् समदकरिघटोत्पिष्टपत्तिनिपत्य

प्रत्यैच्छद् वाञ्छिताप्तिद्विगुणितरभसस्तं रुमण्वान् क्षणेन॥[९]

अर्थात् तत्क्षणं द्वितीयेन विन्ध्येन इव द्विपतिपृतनापीडबन्धेन दिशावकाशान् आवृण्वन् विन्ध्याचलात् बहिर्निःसृत्य योद्धुं पुरोवर्ती बभूव। अथ समदकरिघटोत्पिष्टपत्तिः रूमण्वान् शरान् विक्षिपन् तरसा मुहूर्तेन प्रविश्य वाञ्छिताप्तिद्विगुणितरभसः सन् तम् कोशलेश्वरं प्रजहार इति।

प्रसङ्गानुसारं अलङ्काराणां समुपस्थापनं कविना विहितम्। तेन तु उपमा-रूपक-उत्प्रेक्षा-श्लेष-अप्रस्तुताद्यलङ्काराणां यथास्थानं विन्यासञ्चकार। सन्ध्याकालसम्बन्धितं रूपकमेकं चित्रितम् - सायंकालः समुपस्थितः। पूर्वदिशि चन्दोदयो अचिरादेव भविष्यति। प्राची दिक् तु पाण्डुवर्णाभवत्। विरहजनितपाण्डुभावेन रमण्या पूर्वदिशः ईदृशी उपमा प्रदत्ता –

उदयतटान्तरितमियं प्राची सूचयति दिङ्निशानाथम्।

परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी॥[१०]

अर्थात् यथा रमणी प्रोषितभर्तृका परिपाण्डुनामुखेन प्रियं हृदयस्थितं विषयं सूचयतितथा इयं प्राची दिक् परिपाण्डुना मुखेन चन्द्रं पूर्वपर्वतस्य क्षेत्रेण व्यवहितम् अनुमापयति।

यदा ब्रह्मा सागरिकायाः मुखचन्द्रं निर्मितवान् तदा स्वयमेव विपदि पतितः इति। यतो हि सः एव कमलासनः। तस्य आसने यत् कमलं तत् चन्द्रमसं दृष्ट्वा म्लानं भवति। एवंप्रकारेण उपवेष्टुं प्रस्फुटितं कमलं न लप्स्यते-

विधायापूर्वपूर्णेन्दुमस्या मुखमभूद ध्रुवम्।

धाता निजासनाम्भोजविनिमीलनदुःस्थितः।।[११]

अर्थात् कमलासनः अपूर्वं पूर्णेन्दुं कन्यायाः आननं निर्माय ध्रुवं निजासनाम्भोजविनिमीलनदुःस्थितः सञ्जातः।

द्वीपान्तरात् प्राप्तसागरिकायाः उदयननिवासोपस्थितिः तथा द्वयोः समागमः इति दैवीघटनारूपेण उपस्थाप्य अर्थान्तरन्यासालंकारं प्रस्तुतञ्चकार यत् अनुकूले भाग्ये सति यत्र कुत्रापि मनोरथसिद्धिर्भवेत् –

द्वीपादन्यस्मादपि मध्यादपि जलनिर्धोदशोऽप्यन्तात्।

आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः।।[१२]

अर्थात् अनुकूलभूतः विधिः अपरस्मात् अपि द्वीपात् समुद्रस्य मध्यात् अपि दिशः अन्तात् अपि अभीष्टं वस्तु शीघ्रमानीय संयोजयति।

क्वचित् तु कविना श्लेषस्य सम्यगुपस्थापनं चकार। राजा उदयनः तु चित्रगतां सागरिकां राजहंसीरूपेण मनुते। तस्याः गुणवर्णे श्लेषालङ्कारस्य उपयोगः निम्ने प्रदत्तः –

लीलावधूतपद्मा कथयन्ती पक्षपातमधिकं नः।

मानसमुपैति केयं चित्नगता राजहंसीव ।।[१३]

अर्थात् लीलावधूतपद्मा चित्रगता इयं दृश्यमाना कतमा अस्माकम् अतिरिक्तम् अनुरागं प्रकाशयन्ती मरालीव चित्तक्षेपं प्रविशति।

**छन्दविन्यासः**

हर्षकृतानि नाटकानि विवेच्य इदं ज्ञातं यत् महच्छन्दःप्रयोगे तस्याभिरुचिरासीत्। नाट्यदृष्ट्या अनुपयुक्तश्चेदपि वृत्तवर्णनदृष्ट्या महच्छन्दःप्रयोगस्तु अधिको उपयुक्तोऽस्ति। महच्छन्दः आश्रित्य भाव-वर्णन-क्लिष्टकल्पनानां विस्तृतरूपप्रदाने कविः सिद्धहस्तोऽस्ति। महच्छन्दसा कवेः प्रौढता तथा विदग्धता अवबुध्येते। यत्र तत्र अर्थगर्भितस्य लघुछन्दसः अपि प्रयोगो वर्तते।

शार्दूलविक्रीडितं, स्रग्धरा, श्लोकः, आर्या इति हर्षस्य प्रियकराणि छन्दांसि। रत्नावल्यां यानि त्रयोदश छन्दंसि प्रयुक्ता तानि – शार्दूलविक्रीडितं, स्रग्धरा, आर्या, इन्द्रवज्रा, वसन्ततिलका,मालिनी, शिखरिणी, श्लोकः,शालिनी, हिरणी, पुष्पिताग्रा, प्रहर्षिणी तथा पृथ्वी। रत्नावल्यां विशिष्टानां छन्दसां प्रयोगः एवंकृतो वर्तते यत् शार्दूलविक्रीडितं – २३, स्रग्धरा – ११, श्लोकः- ९, आर्या – ९, प्राकृत आर्या – ५ इति।

**रसपरिपाकः**

नाटिकायामस्यां धीरललितनायकस्य प्रणयवृत्तान्तं चित्रितमस्ति। अतः नाटिका तु शृङ्गाररसप्रधाना वर्तते। रत्नावल्यां शृङ्गारस्तु अङ्गीरसोऽस्ति। अत्र शृङ्गारानुकूलं वातावरणं निर्मितमस्ति। अत्र शृङ्गारस्य पक्षद्वयस्य तात्पर्यपूर्णं वर्णनं लभ्यते। शृङ्गारप्रधानायां नाटिकानुकूलायाम् अत्र मङ्गलाचरणे पार्वती-परमेश्वरयोः मिलनदृश्यं समुपस्थापितवान्।

औत्सुक्येन कृतत्वरा सहभुवा व्यावर्तमाना ह्रिया

तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः।

दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे संगमे

संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः।।[१४]

अर्थात् प्राथमिके समागमे प्रियसाहचर्यलाभोत्कण्ठया कृतत्वरा स्वभावसिद्धया लज्जया परावर्तनप्रवृत्ता बन्धुवधूजनस्य समयोचितैः वचनैः प्रियसामुख्यं प्रापिता। सम्मुखे श्रेष्ठं परिणेतारम् अवलोक्य संरोत्पुलका आत्मसाध्यसरसा हसता शङ्करेण आलिङ्गिता पार्वतीति। अत्र कविना प्रथममिलनं सम्यगुपस्थापितम्।

राजा चित्रलिखितं सागरिकामवलोक्य स्वरसिकतायाः परिचयं प्रयच्छन् कथयति –

कृच्छादूरुयुगं व्यतीत्य सुचिरं भ्रान्त्वा नितम्बस्थले

मध्येऽस्यास्त्रिवलीतरङ्गविषमे निस्पन्दतामागता।

मदृष्टिस्तृषितेव सम्प्रति शनैरारुह्य तुङ्गौ स्तनो

साकाङ्क्षं मुहुरीक्षते जललवप्रस्यन्दिनी लोचने।।[१५]

अर्थात् कृच्छात् उरूयुगम्, अतिक्रम्य, नितम्बस्थले, बहुकालं भ्रमणं कृत्वा, त्रिवलीतरङ्गविषमे, मध्ये, गतिराहित्यम् आगता मन्नेत्रमिदानीं पिपासिता इव उन्नतौ कुचौ मन्दं मन्दम् आक्रम्य एतस्याः जललवप्रस्यन्दिनी चक्षुषी सस्पृहं पुनः पुनः विलोकयतीति।

सागरिकायाः चित्रं तु तस्य सकाशे समुद्रातिक्रमणं तथा पिपासां निवारितुं पर्वतस्थं जलप्रपातस्य जलपानसदृशमस्ति।

राजा उदयनः प्रेमिकायाः सागरिकायाः प्रतीक्षायामासीत्। सः अभिसारिकायाः अवस्थां प्रकटयन् आह –

प्रणयविशदां दृष्टिं वक्त्रे ददाति न शङ्किता

घटयति घनं कण्ठाश्लेषे रसान्न पयोधरौ।

वदति बहुशो गच्छामीति प्रयत्नघृताऽप्यहो

रमयतितरां संकेतस्था तथापि हि कामिनी॥[१६]

अर्थात् सङ्केतस्था प्रमदा समुत्पन्नातङ्का सती मुखे स्नेहस्निग्धाम् ईक्षणं नार्पयति, आलिङ्गने अनुरागप्रकर्षणात् कुचौ निबिडं न योजयति। बलाद्गृहीतापि प्रयामीति अनेवारं भणति। तथापि अहो रमयतीतराम् हि। श्लोकेऽस्मिन् कामीयुवकस्य प्रकृत्यवस्था सम्यगुपस्थापितास्ति।

विप्रलम्भशृङ्गारस्यापि सम्यगुपस्थापनं हर्षेण विहितम्। राजा उदयनः सागरिकावियोगेन दुर्बलोऽभवत्। कामदेवस्य बाणसम्बन्धोनपूर्वकं तेनोक्तम् –

बाणाः पञ्च मनोभवस्य नियतास्तेषामसंख्यो जनः

प्रायोऽस्मद्विध एव लक्ष्य इति यल्लोके प्रसिद्धिं गतम्।

दृष्टं तत् त्वयि विप्रतीपमधुना यस्मादसंख्यैरयं।

विद्धः कामिजनः शरैरशरणो नीतस्त्वया पञ्चताम्॥[१७]

अर्थात् अनङ्गस्य पञ्चबाणाः निश्चिताः, तेषां प्रायः अस्मद्विधः असंख्यो जनः वेध्यः इति यत् संसारे प्रसिद्धिं गतं तत् अधुना विपरीतं विलोकितम्। यस्मात् अशरणः अयं कामातुरः अनन्तैः बाणैः पञ्चतां नीतः।

प्रस्तुतेऽस्मिन् पदे पञ्चबाणैः मृत्यकल्पना अत्यन्तं प्रभावोत्पादकमस्ति। एवंप्रकारेण वियोगाग्नौ दग्धीभूतायाः सागरिकायाः प्रलापस्तु तस्य हृदि पीडां जनयति। यथा उच्यते –

भगवन् कुसुमायुध, निर्जितसकलसुरासुरो

भूत्वा कथं स्त्रीजनं प्रहरन् न लज्जसे।[१८]

अर्थात् 'हे भगवन्! कामदेव! त्वेमव सर्वेषां देवानां असुराणां च विजेतासि। मादृशम् अबलां प्रहरणे त्वं न लज्जसे?' इति।

 © Shodh Patra

SHODH PATRA
Multidisciplinary, Multi-Lingual, Peer Reviewed Open Access Journal
ISSN : 3048-7196, Impact Factor 6.3
Vol. 2, No. 1, Year 2025
Available online : https://shodhpatra.in/

विदूषकमाध्यमेन कविः हास्यरसमुपस्थापितवान्। विदूषकस्य उक्तिः प्रयत्नं च हास्यकरमासीत्। किमपि नावगम्य यत्र कुत्रापि नृत्यारम्भं करोति। अनेन नृत्येन चित्रपटं पतति।

उन्मुक्तकपीनामुत्पातः तथा अन्तःपुरस्थम् अग्निप्रज्वलनञ्चेति भयानकरसस्य दृश्यमुपस्थापयति। कपीन् दृष्ट्वा स्त्रियः भीताः अभवन्। नपुंसकाः लज्जां त्यक्त्वा पलायिताः। वामनाः कञ्चुकीवस्त्रे उपगूहन्ति। एवंप्रकारेण अन्तःपुरस्थम् अग्निज्वलनं दृष्ट्वा स्त्रियः आर्तनञ्चक्रुः। अग्निज्वलनस्य प्रसारणहेतोः राजभवनस्य शिखरस्तु स्वर्णमयोऽभवत्। अग्निहेतोः उद्यानस्थानि वृक्षाणि दग्धान्यभवन्। अग्निज्वलनहेतोः उत्पन्नधूमात् सजलमेघदृश्यमुपस्थितम्। रुमण्वता कोसलनरेशस्य युद्धं तु वीररस्य सुन्दरमेकमुदाहरणमस्ति। रुमण्वानः तु असख्यबाणैः कोसनरेशं हत्वा विजयी अभवत्। यद्यपि श्रीहर्षः शृङ्गाररसचित्रणे सफलोऽस्ति तथापि अन्यरसविरचने सुकौशलं प्रयुक्तवान्। यथास्थाने च व्यवहृतवान्। सुन्दरभावप्रयोगे, भावानुरूपं भाषाप्रयोगे, उच्चकोटिचिन्तने, विविधालङ्कार-छन्दसां च प्रयोगे कविश्रीहर्षः निपुणोऽस्ति। अस्य रचनाशैली पाठकानां मनः आकर्षयति।

**उल्लेखपञ्जिः**

१. रत्नावली ४.३

२. रत्नावली १.२५

३. रत्नावली ३.१३

४. रत्नावली २.१

५. रत्नावली ३.१५

६. रत्नावली ४.१

७. रत्नावली ३.६

८. रत्नावली ३.२

९. रत्नावली ४.५

१०. रत्नावली १.२४

११. रत्नावली २.२०

१२. रत्नावली १.६

 © Shodh Patra

१३. रत्नावली २.८

१४. रत्नावली १.२

१५. रत्नावली २.११

१६. रत्नावली ३.९

१७. रत्नावली ३.३

१८. रत्नावली, अङ्क – २

**परिशीलितग्रन्थपञ्जिः**

१) अग्रवाल, डॉ. संगीता। साहित्यदर्पणः। नई दिल्ली मुरारीलाल एंड सन्स पावलिशार्स, २०२२।

२) अय्यर, रामचन्द्रः। नागानन्दम्। Palghat Kalpathy R.S Vadhyar & Sons Publishers, 2000 .

३) त्रिपाठी, डॉ. राधावल्लभ। संस्कृत साहित्य का समग्र इतिहास। दिल्ली न्यु भारतीय बुक कारपोरेशन, २०१८।

४) द्विवेदी, डॉ. शिवबालकः। रत्नावली नाटिका। जयपुर हंसा पर्काशन, २०१९।

५) पाण्डेय, डॉ. जयमंगलः। रत्नावली नाटिका ( किरणाख्य-हिन्दी-संस्कृतव्याख्योपेता )। वाराणसीः चौखम्बा विद्याभवन, २०१९।

६) प्राचार्य, श्रीमोहनदेवपन्तः। हर्षचरितम्। नई दिल्ली मोतीलाल बनारसीदास पावलिशार्स प्राइभेट लिमिटेड, २०१६।

७) मिश्रः, डॉ. श्रीनारायणः। झा, डॉ. शशिनाथ। रसगङ्गाधरः। वाराणसीः चौखम्वा कृष्णदास अकादमी, २०१७।

८) मिश्रः, श्रीरामचन्द्रः। प्रियदर्शिकाः ( प्रकाश संस्कृत-हिन्दीटीकोपेता )। वाराणसीः चौखम्बा विद्याभवन, १९७६।

९) मुसलगाँवकर, डॉ. राजेश्वर शास्त्री। रत्नावली नाटिका ( किरणावली संस्कृत-हिन्दी-व्याख्याद्वयोपेता ) वाराणसीः चौखम्भा संस्कृत संस्थान,२०१४।

१०) मोहन, डॉ. ज्योत्स्ना। काव्यप्रकाशः। जवाहर नगर दिल्ली नाग प्रकाशक, १९९९।

११) शास्त्री, डॉ. राकेशः। शास्त्री, डॉ. प्रतिमाः। नागानन्दम् ( चन्द्रिका हिन्दी व्याख्या एवं हिन्दी अनुवाद )। दिल्ली संस्कृत ग्रन्थागार, २००८।

१२) शास्त्री, डॉ. साहु व। हर्षचरितम्। जयपुरः हंसा प्रकाशन, २००२।

१३) शास्त्री, रामनाथत्रिपाठी। प्रियदर्शिकाः ( कल्याणी संस्कृत-हिन्दोव्याख्योपेता )। वाराणसीः चौखम्बा अमरभारती प्रकाशन, १९७८।

१४) Kale, Mangesh Narayanrao. Priyadarsika of Sriharsadeva. New Delhi Motilal Banarsidass Publishers, 1999.